3	यकारलोपः प्रत्ययान्तरं वा	यकारलोपः प्रत्ययान्तरं वा ॥
9	अपवादो वा	यकारलोपः प्रत्ययान्तरं वापवादो वा ॥ ॥ २ ॥
0	वृषभ इति देवताख्यानम्	वृषभ इति देवताख्यानम् ॥
1	अस्तेः प्रैषण्या मध्यमस्यैकवचनम्	अस्तेः प्रैषण्या मध्यमस्यैकवचनम् ॥
		[शिवा न इहैधि सहुरे हूत एधि सह मेधेधीहैधि पुरुषेहैवैधि माप च्योष्ठाः समुद्र इवैध्यक्षितो ऽजस्र एधि पयसा सहैधि देवताभिः सहैध्यत्रैवैधि पितृषु पुरुषगन्धिरेधि सम्राडेवैधि इति त्रीणि; अपतिघ्नीहैधि चारुरेधि प्रियः इहैवैधि धनसनिरिहैधि वीर्यवत्तरः इति ॥]
2	इत्येतेरिहीत्यन्यत्र	एतेरिहीत्यन्यत्र ॥

13	परस्तात्पुरस्तादन्यानि	परस्तात्पुरस्तादन्यानि। अतिसर्पतिपरस्ताद्यदन्तरा रोदसी यत्परस्तात्पूषा परस्तादस्माभिर्दत्तं जरसः परस्तात्। उपह्वताग्ने (?) जरसः परस्ताद्ध्रुवं परस्ताद्यतरा परस्तादेकपत्नीः परस्तादमोचि शुको रजसः परस्तादर्वाङ् परस्तात्प्रयतः ॥	॥ ३ ॥
14	ऐकारान्तान्याकाराबाधे	ऐकारान्तान्याकाराबाधे ॥	
15	यान्याकारोपधानि मकारान्तानि स्त्रियैकवचनानि ह्रस्वोपधानि पुंवचनानि	यान्याकारोपधानि मकारान्तानि तानि स्त्रियैकवचनानि ह्रस्वोपधानि पुंवचनानि ॥	
		Examples ..	॥ ४ ॥

॥ इति प्रथमः पाद. ॥

16—1	ऊष्मान्तानि स्वरान्ताबाधानि	ऊष्मान्तानि स्वरान्ताबाधान्याकारान्तात् स्त्र्यामेकवचनानि ॥	
17—2	लोपसंदेहे	लोपसंदेहे तदा यत्पञ्चमीषष्ठ्योरेकवचनम् ॥	
18—3	तृतीयासंदेहे सान्ताच्च	तृतीयासंदेहे सान्ताच्च ॥ —स्त्रीपुंसयोः प्रथमाया एकवचनमनुनासिकान्ताद्धातोः कृतात्वात्प्रत्ययलोपिनः ॥	
19—4	आकारान्ताच्च प्रत्ययलोपिनः	आकारान्ताच्च प्रत्ययलोपिनः ॥	
20—5	आख्यातं गकारान्तादेव	आख्यातं गकारान्तादेव ॥	
20b—5b	भूतेऽद्यतन्या मध्यमस्यैकवचनम्	भूतेऽद्यतन्या मध्यमस्यैकवचनम् ॥ बहुवचनं परपूर्वमकारान्ताच्च प्रातिपदिकात्प्रथमाया बहुवचनम्। तानि सर्वत्र ॥	॥ ५ ॥
		Examples	॥ ६ ॥
21—6	एना अनुदात्तम्	एना अनुदात्तम् ॥	॥ ७ ॥
22—7	ऊष्मान्तानि सकारे परतः संयोगादौ च	ऊष्मान्तानि सकारे परतः संयोगादौ च ॥	
23—8	शकारादौ च	शकारादौ च ॥ समास्त्वाग्ने या महत्यस्येन्द्र कुमारस्योत्प्लुतौऽभिभूर्यज्ञो दमूना अनाधृष्यः परः सो अस्तु जितमस्माकमिमामेषामतन्द्रो यास्यन्ननुव्रता रोहिणी तिग्मो विभ्राजं	
24—9	विश्वा विसर्जनीयान्ताः	दण्डं हस्तादिति विश्वा विसर्जनीयान्ताः ॥	॥ ८ ॥
25—10	स्वरान्तान्यूष्मान्ताबाधानि	स्वरान्तान्यूष्मान्ताबाधानि ॥	
26—11	एना अन्तोदात्तम्	एना अन्तोदात्तम् ॥	
27—12	स्वरान्तानि सकारे परतः संयोगादौ च	स्वरान्तानि सकारे परतः संयोगादौ च ॥ शकारादौ च ॥	॥ ९ ॥
28—13	गोपा मे स्तमभूतं गोपा इति द्विवचने	गोपा मे स्तमभूतं गोपा इति द्विवचने ॥	
29—14	एकवचनद्विवचनबहुवचनान्यूष्मान्तानि	एकवचनबहुवचनान्यूष्मान्तानि ॥	

30—15	प्रपा-कूपा-देवगोपा-इत्यतोऽन्यानि पा इत्यूष्मान्तानि	प्रपा-कूपा-देवगोपा इत्यतोऽन्यानि पा इत्यूष्मान्तानि ॥	
31—16	भूरिधारा-शतधारा-मधुधारा इत्येकवचनानि	भूरिधारा-शतधारा-मधुधारा इत्येकवचनानि ॥	
32—17	स्त्रीबहुवचनान्यूष्मान्तानि	स्त्रीबहुवचनान्यूष्मान्तानि ॥	
33—18	स्तनयन्नेति वृष्ट्या पर्जन्यस्य वृष्ट्याभीपतो वृष्ट्या इति तृतीयान्तानि	स्तनयन्नेति वृष्ट्या पर्जन्यस्य वृष्ट्याभीपतो वृष्ट्येति तृतीयान्तान्यूष्मान्तान्यन्यानि ॥	
34—19	ग्राह्यामित्रान्ग्राह्या गृह्य ग्राह्यैनं विध्यामि इति	ग्राह्यामित्रान्ग्राह्या गृह्य ग्राह्यैनं विध्यामि इति तृतीयान्तान्यूष्मान्तान्यन्यानि ॥	
35—20	एना पृथिव्या पृथिव्योरसा सं त्वा-दधामि पृथिवीं पृथिव्या दिवा पृथिव्या इति	एना पृथिव्या पृथिव्योरसा सं त्वा दधामि पृथिवीं पृथिव्या दिवा पृथिव्या इति तृतीयान्तान्यूष्मान्तान्यन्यानि ॥	
36—21	ता वो नामानि सिन्धवस्त्वं ता विश्वा यस्ता विजानादा घा ता गच्छान्त्सर्वा ता यम आर्पिता इति नपुंसकबहुवचनानि	ता वो नामानि सिन्धवस्त्वं ता विश्वा यस्ता विजानादा घा ता गच्छान्त्सर्वा ता यम आर्पिता इति नपुंसकबहुवचनानि ॥	॥ १० ॥
	Some mss., including ours, divide 20 into two sūtras In that case, the number of the sūtras, in this section, is 22=37	नैगमी वा ततोऽन्यत्र भूते वा बहुलमिति । सदृशानामतोऽन्यत्र भवतीति प्रयोजनम् ॥	

॥ इति द्वितीयः पादः ॥

37—1	प्रो दीर्घः	प्रो दीर्घो यत्र दृश्येतावर्णादिपरं पदम् । 'प्रा वोचं' वर्जयित्वा द्वे व्यञ्जनेऽन्यत्र न क्वचित् ॥	॥ ११ ॥
38—2	भूते ङः स्यादितः	भूतेऽङ्स्यादितोऽकारो यत्रावर्णात्परो भवेत् ।	
39—3	छन्दसि	छन्दस्युभयदृष्टत्वादाबाधे तत्प्रयोजनम् ॥	
40—4	अदन्तस्य	अदन्तस्योपसर्गस्य दीर्घत्वं यत्र दृश्यते । अवर्णादि परं पदं सवर्णे दीर्घ एव सः ॥ अकारान्तादकारादि भूतकाले परं पदम् । अघोषश्चेत्परोऽकारान्न तादृक् पठ्यते पदम् ॥	
41—5	एष स व्यञ्जने	'एष स' व्यञ्जने लोपः स्वरेषु स्वरसंधयः । ओकारो यत्र दृश्येताकारादि परं पदम् ॥	
42—6	एकादेशे तु	एकादेशे तु दीर्घान्ताः संदिग्धाः संहिता यदा । बहुलं छन्दसीत्युक्तं तदर्थं पठितो गणः ॥	॥ १२ ।
		Examples	॥ १३ ।
43—7	आकारात्	आकारात्केवलात्पदाद्भूतकाले परं पदम् । अकारादीनि सर्वत्र सोण् माङ्योगे तु नेष्यते ॥	
44—8	कृदन्ते अन्यवर्णान्ताच्च	कृदन्तेऽन्यवर्णान्ताच्च । सर्वत्रैकारान्ताच्च ॥	॥ १४ ।

45—9	एना एहा आदयः प्रकृत्या	एना एहा आदयः प्रकृत्या ॥ पृच्छामि वाचः परमं व्योम ब्रह्मायं वाचः परमं व्योमो-त्तमं नाकं परमं व्योम विश्वंभरानुसर्पानुम्रोकोदाशावो रथा इवाशूनिव सुयमान्पतत्याशुमत् इति त्रीणि । आशु-गांष्ठामिव पृतनाजिमाशुं सुपक्षमाशुमाशुर्विपाश्चित्पतयन्त-माशुम् (?) उत्पिपान श्लोककृद्यं पिपान इन्द्रो मा ते हृदयमर्पिपसुत्पिपानं बृहस्पते पुना रूपाणि देव त्वष्टा रायः प्राता रात्र्यप्स्व१न्ता रक्षतु त्वा— रोदसी वरुणानी पिबतं रोचने शिशीते तिरते धत्ते उर्वी गव्यूतिर्देवकृते पथ्यभिश्रावे भवतः; ते प्रगृह्यमध्ये ॥
46—10	ते प्रगृह्यमध्ये; भूतादिभ्यः पतिरुत्तर-पदमाद्युदात्तम्	भूतादिभ्यः पतिरुत्तरपदमाद्युदात्तम् ॥
47—11	द्वियकाराणि	द्वियकाराणि ॥
48—12	द्विजकारे	'मज्जा रज्जुः' इति द्विजकारे ॥
49—13	द्विलकारम्	क्षुल्लका इव इति द्विलकारम् ॥
50—14	द्विपकाराणि	पिप्पली पिप्पलं पिप्पलयः इत्येवमादीनि द्विपकाराणि ॥
51—15	द्वितकाराणि	पित्तं वित्तमुन्मत्तम् इत्येवमादीनि द्वितकाराणि ॥
52—16	द्विनकाराणि	अन्नं छिन्नं वाचमविश्वविन्नाम् इत्येवमादीनि द्विनकाराणि ॥ नशब्दप्रत्ययो यत्र दकारान्तात्परो भवेत् । सर्वाणि द्विनकाराण्यवपन्नं निदर्शनम् ॥ तस्यापवादः । नुत्तानां परिवित्तो मत्तो रजस्या निषत्ताः ॥ १५ ॥
53—17	एकारान्तानि	एकारान्तान्यकाराबाधे ॥
54—18	नानापदानि	नानापदान्येकपदाबाधे ॥ शं योः प्राणेहैव याभ्यामृते न वलदावा नस्ते न विन्दन्ते न्यञ्चनं सदनं गवीनामिन्द्र मेघ१हं तव मास्मातोऽर्घाङै-र्घर्म आ गतं भाग आ गतं त आ गतावसा स योनिमैति सा नौ नाभिर्जार आ भगं चक्रमा को वि वेद च्यावयतु प्र विद्वान् न हि द्युना यथायमरपा असद्यथा द्यौश्च पृथिवी च न बिभीत इति षट् ॥ यच्च प्राणति याचितां च न दित्सति यांश्च पश्यामि यांश्च न इति नानापदानि ॥ ॥ १६ ॥
55—19	अभ्यासस्य	विश्वमन्यामभीवार जागार प्रविशिवांसम् इत्यभ्यासस्या-पवादः ॥ एकपदानि नानापदाबाधे ॥
56—20	अकारान्तानि प्रैषण्या मध्यमस्यैक-वचनानि	अकारान्तानि प्रैषण्या मध्यमस्यैकवचनानि; नैगमी तकाराबाधे ॥
57—21	नैगमी तकाराबाधे	
58—22	स्वरितान्तान्युदात्तसंहितान्युदात्तेनै-कादेशे	स्वरितान्तान्युदात्तसंहितान्युदात्तेनैकादेशे ॥

59—23	प्रतिषेध उदात्तोऽस्मदादेशे	प्रतिषेध उदात्तोऽस्मदादेशेऽनुदात्तः ॥ अनुदात्तान्युदात्तसंहितान्युदात्तेनैकादेशे ॥
60—24	ऊकारावग्रहाणि	ऊकारावग्रहाणि ॥
61—25	नकारावग्रहे प्रकृतिभावश्च	नकारावग्रहे प्रकृतिभावश्च ॥
62—26	मकारावग्रहाणि	मकारावग्रहाणि ॥
63—27	सु इत्येतेनोपसर्गेण	सु इत्येतेनोपसर्गेण ॥
64—28	स्वशब्देन	स्वशब्देन ॥

॥ इति तृतीयः पादः ॥

प्रो दीर्घः ॥
तेशब्दा अनुदात्ता ये छन्दस्युभयसंज्ञिनाः ।
वक्ष्यामो युष्मदादेशे समधा निगमश्रुतान् ॥
तेऽश्मानं तेऽयनं चैव तेऽपस्कं ऽक्षिणी च यत् ।
अमुं ते न्विह ते ऽसुश्च यथा ते ऽस्मानि सूर्मिया ॥
विद्यादुदात्तमन्यत्र तेशब्दाः सर्वनाम यत् ।
अनुदात्तं तवेत्यर्थे भाषितं यत्र तत्र तु ॥
अर्थं दृष्ट्वा पदं वाच्यं यत्र यत्र यथा यथा । ॥ १७ ॥

65—1	ददातेः	ददातेः ॥
66—2	इति सार्वधातुके	वास्नो ददाति भर्तेव इति सार्वधातुके ॥
67—3	रयिं दा इति भूते	रयिं दा इति भूते । अघनम्या इति सर्वत्र ॥ ॥ १८ ॥ इदमः सर्वलिङ्गेषु तृतीयादिषु यो विधिः । अन्वादेशेऽनुदात्तान्यन्तोदात्तानि पूर्वशः ॥ अन्तोदात्तान्यर्थपादादौ तद्विभक्तिपरपूर्वं च ॥
68—4	समानाधिकरणे समानार्थे पदव्यवाये-ऽप्यस्मै शतादीनि चान्तोदात्तानि	समानाधिकरणे समानार्थे पदव्यवायेऽप्यस्मै शतम् आदीनि चान्तोदात्तानि ॥ Examples ... ॥ १९ ॥ Examples ... ॥ २० ॥
69—5	लुप्तशेषेणावग्रहः प्रकृत्यादेशश्च	लुप्तशेषेणावग्रहः प्रकृत्यादेशश्च ॥
70—6	दन्तपादहृदयोदकनासिकासहस्रमान-रात्रिजायादारुमासाः पुंसि शकृच्छ्रमावद्गम्भीरमिति	दन्तपादहृदयोदकनासिकासहस्रमानरात्रिजायादारुमासाः पुंसि शकृच्छ्रमावद्गम्भीरम् इति ॥
71—7	नलोपे च पादस्य	नलोपे च पादस्य ॥
72—8	दीर्घायुत्वायादिषु च	दीर्घायुत्वाय आदिषु च ॥
73—9	पातयतेर्दीर्घोपधस्य	पातयतेर्दीर्घोपधस्य ॥ नि स्तुवानस्य पातय विषूचीमिन्द्र पातय पर्णं शुष्कानि पातय शरमिव पातयामसि नभ उत्पातयाथान्वश्मनु

		पातय श्येनौ संपातिनाविव वि पपातानु घोषं विद्युतं पातयैतां धूमं पर्युत्पातयासीति ॥
74—10	पादयतिरन्यत्र	पादयतिरन्यत्र ॥
75—11	पद्यतिरन्यत्र	आप्तमाप्त्यानां पत्यमाने इदमा पपत्याद्यौ पत्यैत इति ॥ पद्यतिरन्यत्र ॥
76—12	सयकाराणि	अभि त्यं त्यमू षु प्रति त्ये तं एत उ त्ये पतयन्त्युदु त्यं जातवेदसमप त्ये तायवोऽध त्यं द्रप्सम् इति सयकाराणि तमि-
77—13	तमित्यस्मिन्नर्थे	त्यस्मिन्नर्थे ॥ ॥ २१ ॥
78—14	उत्तमा उत्तमेष्विति	अञ्चत्यन्तं प्रथमान्तमुत्तमे परतो द्विधा । उत्तमानुत्तमेष्वित्यर्वाङ् मध्ये पराङ्मनाः ॥ अञ्चत्यन्तमतोऽन्यत्र यथासंहितमेव तत् । स्वरे वा व्यञ्जने वाक्यं तथा तद्विभजेत्पदम् ॥
79—15	तकारान्ते	इन्द्रो मे ऽहिमरन्धयन्मित्रश्च जरन्नाम महत्पदम् । तकारान्ते पदे विद्याज्जकारादिषु तज्जरत् ॥ अवपश्यं जनानां तृणहां जनं प्रैष्यं जनं विवाहां ज्ञातीन्निरूहं जीवातवे ते स्फूर्जयं जातवेदः श्रपयं जातवेदः पश्यं जातवेदः पश्यं जन्मानि गमयं जातवेदा इति—
80—16	नकारान्तानि मकाराबाधे	—नकारान्तानि मकाराबाधे ॥ निःसालां धृष्णुमशां निर्ऋत्या इरां जङ्गाभिः प्रायं नान्वानशे वत्सां नि बध्नीमः शतापाष्ठां नि गिरति तां न शक्नोति मष्मषाकरं दृषदाकरं नमोऽपथेना जभारैणां तां त्वाछावदामसि वर्धयैनां नुदस्व प्रत्यङ्केनां देवताभिर्य एनां निप्रियायतेऽथैनां निप्रियायतेऽथैनां देवा अब्रुवन्ननत्युद्यं जना विदुः शीभं नानारूपे उदागां जीवो गमयां चकारेति
81—17	मकारान्तानि	—मकारान्तानि नकाराबाधे ॥ ससं नु दर्शं नु स प्राच्यां नीयसेऽदृष्टान्नि शमयद्धानान्मध्वा समञ्जन्निरेव धन्वन्नि जजास गव्यं दुन्दुभ आयन्न्य१न्या अर्कम् इति—
82—18	नकारान्तानि	—नकारान्तानि मकाराबाधे ॥ अकरन्महां मृडतान्महां जानीतान्नः स्वान्मित्रो जिह्मो लोकान्निर्ऋछतीति तकारान्तानि नकाराबाधे ॥ तं निष्कुरु तं नि दध्मस्तं नो भूमे तं नस्तपस्तं निर्दहत तं नो गोपायतास्माकम् इति षण्मकारान्तानि नकाराबाधे ॥ २२ ॥

॥ इति चतुर्थः पादः ॥

॥ द्वितीयः प्रपाठकः समाप्तः ॥

॥ आथर्वणे प्रातिशाख्यमूलसूत्रे

द्वितीयः प्रपाठकः समाप्तः ॥

[अथ तृतीयः प्रपाठकः]

ओं रेफपरिहाराणि ॥

1 रेफप्रकृतिघोषवत्स्वरेषु

रेफप्रकृतिघोषवत्स्वरेषु ॥
रेफ इति ॥
निर्ऋत्या अकः सायंप्रातर्वेन आवरर्सतश्च वि वर्धानंव कः प्रथमा द्वारिह राष्ट्रमाहार्दिव्यं घृतं चाः सुरभीरक-

2 अव्ययानि च

रित्यव्ययानि च ॥
प्रगृह्याणां प्रकृतिभावस्यापवादः ॥

3 आमन्त्रित ओकार इतावनार्षे प्रकृत्या

आमन्त्रित ओकार इतावनार्षे प्रकृत्या ॥
अकारादौ प्रकृत्या एकादेशोऽपि वा क्वचित् ।
यस्ते मन्योऽविधद्यथा प्रकृत्यान्यत्र लक्षयेत् ॥ ॥ १ ॥

4 अपिपूर्वो दधातिः

अपिपूर्वो दधातिः ॥

5 आम्रेडितसमासस्य

आम्रेडितसमासस्यापवादः ॥
उभे यत्र द्विरुक्तानां सोऽन्तेन विगृह्यते ॥
आख्यातं यद् द्विरुच्यते नीचैः पूर्वपदं भवेत् ।
परमुच्चैर्विगृह्यते 'धत्त धत्ते' ति निदर्शनम् ॥

6 अनाम्रेडितान्याम्रेडितसदृशानि

अनाम्रेडितान्याम्रेडितसदृशानि; भूमा भूमा पशूनां नमो नमो देवजनेभ्यो माया ह जज्ञे मायायां मायाया ये ये चेमे ब्रह्मचारी ब्रह्मचारी स्योना स्योनागन्म स्वः१स्वर्मा मा वोचन्मा मा हिंसिष्टं ते तै भिनद्मीति यथा ॥ ॥ २ ॥

7 षत्वणत्वोपाचारदीर्घत्वसमापत्तेः

षत्वणत्वोपाचारदीर्घत्वसमापत्तेरपवादः ॥
सूनृतावदपाष्ठवदिति षत्वस्य ॥
विषुरूपा प्रतिबुध्यमाना अप्रतिमन्यूयमानाः;
अभ्यघायन्ति तादुरि—
अष्टनः—
हिनोतेः—
बोधप्रतीबोधौ केसरप्राबन्धायाः अभ्यघायन्ति पनिष्पदा-तिष्ठिपं दाधार जागार भीमायेति उपाचरितस्यापवादः ॥ ॥ ३ ॥
गवां यः पतिर्दीर्घायुरस्या यः पतिर्भूम्याः पृष्ठे हस्तिन्याः पदेन यस्याः पदे परि भ्रातुः पुत्रादायुः प्रतरं दधाना जीवानामायुः प्र तिर ये नः पितुः पितरो हविः पुरो-डाशम् ॥
षत्वस्यापवादः । गोसनिं वि सीमतोऽभि सिष्यदेऽनु सूतुं सवितवेऽतिसराः प्रतिसरोऽधि स्कन्द वीरयस्वाभिस्कन्दं मृगीवाभि स्याम पृतन्यतः प्रतिस्पाशनं पश्चानु सेचिरे गात्रानु सर्वा ॥

रपर-सृपि-सृजि-स्पृशि-स्पृहि-स्फूर्जि-स्वरति-स्मरतीनां च॥
णत्वस्यापवादः। चित्रभानो प्रपीनाः प्रपीनां प्रमनाः प्र नभस्व प्र नभतां परिह्विनोमि पर्यैनां ब्रह्मनुत्तं प्र मिनीजनित्रीं प्र मिनन्ति व्रतानि न प्र मिनाति संगिरस्त्रिनामंस्त्रिनाभि त्रिनाके ॥ ॥ ४ ॥

बालिति पर्वास्या ग्रभीता दूडाशो पापमार्ष्टु पुमान्पुंसः परिजातो यां वा ते पुरुषेषु य उग्रीणामुग्रबाहुर्ययुः सुप्राव्यां ३ स्वर्षाः स हिन त्वं तुविष्टमो वृत्राँ वनानि सं चर यत्र त्वाछावदामस्यदितिर्जनित्वमोण्योरमतिभाः स च त्वानुह्वयामसि वीरतमा शविष्ठा वि चयत्कृतं नोऽधरः सस्पदीष्ट यमु ह्रिष्मो वरीयो यावया इतो यज्ञं नयत देवता नः पतयन्ति नक्षभिर्यातुमावत्कूष्ठराधिरुपजीवनीयो हस्तिनीव पद्वती षड्र आहुरर्पितं नहि तज्जराय युक्ष्वा रथं सुवृजनासु दिक्षु मानुषीषु दिक्षु मास्य त्वचं चिक्षिप ऋक्षाकं वा नीचायच्छशयुरस्माकासो ययोर्वधान्नापपद्यते पर्यैति रक्षन्विश्यानां वधा वन्याय तक्मनेऽदितेरकार्षं तदु षु प्र वोचत्सुतपौ मा ते रिषन् विद्मनो न विद्वान्यथैषु सत्यमुदप्लुतमिव दारु संशितं समिद्धे जातवेदसि ब्रह्मणा कस्मिन्नङ्गे सुकृतामेतु लोकं बभ्रेरध्वर्यो देव सेनाभ्यः प्राणेन समवादिरन्नापस्पुत्रासो अभि सं विशध्वं पितेव पुत्रानभि सं स्वजस्व नः॥
परिपूर्वश्च गणः॥
हकारादिः संयोगः इवर्णस्थो यकारादौ न गुरुर्भवति इति ॥ ५ ॥
दीर्घत्वसमापत्तेरपवादः। शपथयावनीं यवयावानः॥

8	कृणोत्विति	कृणोत्वित्यत्र त्रिधातु षत्वं न ॥
9	मतौ ह्रस्वः	मतौ ह्रस्वः ॥
10	संहितायां विसर्जनीयस्य	संहितायां विसर्जनीयस्य लोपः ॥
11	उत्तममुदात्तम्	उत्तममुदात्तम् ॥
12	उत्तरपदे ह्रस्वः	उत्तरपदे ह्रस्वः ॥
13	आद्यक्षरस्य वृद्धिः	आद्यक्षर(स्य) वृद्धिः ॥
		चक्षुषमिति पञ्चपद्याम् ॥
		प्रसारणं दिप्सतीत्याद्यचतुर्थप्रतिषेधे ॥
14	यकारादौ बहुलं दीर्घः	यकारादौ बहुलं दीर्घः ॥
		न भवन्ति। अरातियाज्जनियन्ति पुत्रियन्ति मृगयुः प्रभृतीनि च ॥
15	गविष्टौ गवेषण इति न लोपो वकारस्य •	गविष्टौ गवेषण इति न लोपो वकारस्य ॥

16	शपथेय्यं सहशेय्यायेत्येकारात् परो यकारः	शपथेय्यं सहशेय्यायेत्येकारात्परो यकारः ॥
		जायामुपैमि तद्ब्राह्मणं पुनरस्मानुपैतु इत्यैकारः ॥
17	पूर्वपरौ ह्रस्वौ	पौत्रायमन्नाद्यं मेधातिथिं पुरुषास्थे अंशे अक्रव्यादिति पूर्वपरौ ह्रस्वौ ॥
18	अकारेकारावागमौ पूर्वस्य	अर्पवान् ज्योतिषीमानित्यकारेकारावागमौ पूर्वस्य ॥
		संस्राव्येण हविषा जुहोमि समानेन वो हविषा जुहो-
19	विधेमेत्यन्यत्र	मीति । विधेमेत्यन्यत्र ॥
20	अकारान्तान्निवति	अकारान्तान्निवति ॥
21	एकारान्ताच्च	एकारान्ताच्च ॥
22	ओकारान्ताच्च	ओकारान्ताच्च ॥
		Examples ... ... ॥ ६ ॥

॥ इति प्रथमः पादः ॥

23—1	उत्पूर्वो हृषिः	उत्पूर्वो हृषिः ॥
		मही क्षेमं मही अस्कभायन्मही रोधचक्रे इति द्वि-
24—2	एकवचनान्यन्यत्र	वचनानि । एकवचनान्यन्यत्र ॥
25—3	तकारान्तानि	तकारान्तान्याकाराबाधे ॥ आरात्त्वदन्या दूरात्त्वा त्व ऋषभः ॥
26—4	ङ्यन्ताद्वा सुर्न लुप्यते कृदन्ताद्वा	ङ्यन्ताद्वा सुर्न लुप्यते कृदन्ताद्वा ॥
		ईकारे वापि मत्वर्थे ॥
		स प्रत्युदैत्सलिलादुदैता यतमाने यदैतमन्वैतद्व्रतेन इत्ये-
27—5	एकारादीन्येतेर्ह्यस्तन्याम्	कारादीन्येतेर्ह्यस्तन्याम् ॥
		प्रेतं पादौ प्रेता जयता तत्परेताप्सरसः क्रव्यादा प्रेतं
28—6	आख्यातेन विग्रह उपसर्गेण च	दक्षिणा इत्याख्यातेन विग्रह उपसर्गेण च ॥
29—7	अव्ययेन च	प्रेतो यन्तु प्रेतो मुञ्चामीत्युपसर्गेण विग्रहोऽव्ययेन च ॥
30—8	यथाशास्त्रं क्रमः संयोगे	यथाशास्त्रं क्रमः संयोगे ॥
		वर्तं वेशन्त्या इवान्वविन्दाम कर्त्रं कर्त्रं कृत्याकृता कृतं
31—9	रेफमध्ये तकारः	पुनः कर्त्रं इति रेफमध्ये तकारः ॥
32—10	रेफमध्ये सकारः	प्रसर्स्रोणमिति रेफमध्ये सकारः ॥
		अस्थन्वच्छिन्नस्य इति इति सथनाः । यथास्थानं यमः ॥
33—11	ख्यातौ ख्ययौ शुश्रुषीति बाधौ शुचेः	ख्यातौ श्कयौ शुशुग्धीति बो धौ शुचेः ॥
		अन्वान्त्र्यं मित्रतूर्याय विश्वगोत्र्यः संबाधतन्द्र्यो यजुष्यौ
		भागमृत्व्यो मात्व्यौऽधोगन्तु छ्य श्यामेन स्फयावंसौ इति
34—12	यकारान्तः संयोगः	यकारान्तः संयोगः ॥
35—13	हकारान्तः संयोगः	गर्ह्हे विल्हौ (?) हकारान्तः संयोगः ॥
36—14	तमौ	त्मना त्मन्या इति तमौ । यथास्थानं यमः ॥

37—15	गमौ	जग्मे अग्मतम् (?) इति गमौ । यथास्थानं यमः ॥
38—16	कनौ	कनिक्रतमिति कनौ । यथास्थानं यमः ॥
39—17	पनौ	पनिप्नतमिति पनौ । यथास्थानं यमः ॥
		अभ्यासस्यागमो नीत्युपधा लुप्यते पनेः ।
		छन्दसीत्यागमो लोपः पनतेश्चर्करीतवत् ॥ ॥ ८ ॥
40—18	ककारादिः संयोगः	परिवृक्ताज्येनातिषक्तेति ककारादिः संयोगः ॥
41—19	रेफादिः संयोगः	अनवधर्ष्यमिति रेफादिः संयोगः ॥
42—20	कृत्तीर्दूर्शानीतीकारः	कृत्तीर्दूर्शानि इतीकारः । ऐकारोऽन्यत्र ॥
43—21	यो अश्व्येनेति यकारः	यो अश्व्येनेति यकारान्तः संयोगः ॥
44—22	विकारेऽवयवे वा	विकारेऽवयवे वा ॥
		वृक्न इति कनौ । वृश्चेः । यथास्थानं यमः ॥
		यक्न इति कनौ । यथास्थानं यमः ॥
45—23	हैरण्यैरिति णयौ	हैरण्यैरिति णयौ ।
√46—24	ताम्रधूम्रा इति मरौ	ताम्रधूम्रा इति मरौ ॥
47—25	नद्यो वेशन्त्या इवेत्ययकारम्	नद्यो वेशन्ता इवेत्ययकारम् ॥
48—26	त्वष्ट्रेव रूपमिति तृतीयान्तम्	त्वष्ट्रेव रूपमिति तृतीयान्तम् । रेफान्तः संयोगः ॥
49—27	अपरुध्म इति धमौ	अप रुध्म इति धमौ । यथास्थानं यमः ॥
50—28	कल्मलिः कुल्मलमिति लमौ	कल्मलिः कुल्मलमिति लमौ ॥
51—29	सत्ते द्वितकारम्	रजस्या निषत्ता इति सत्तेर्द्वितकारम् ॥
52—30	आर्द्रहस्ता समङ्क्त इति रेफङकारादिः संयोगः	आर्द्रहस्ता समन्त इति रेफनकारादिः संयोगः ॥
53—31	तिर्यमिति तिरौ	तिर्यमिति रयौ ॥
54—32	ऋभ्वार्णं मातरिभ्वरीति भवौ	ऋभ्वार्णं मातरिभ्वरीति भवौ ॥
55—33	अन्तवच्चा समन्ते प्र यद्धन्दिष्ठो जिह्वां नि तृन्धीति नकारादिः	अन्तवच्चा समन्ते प्र यद्धन्दिष्ठो जिह्वां नि तृन्धि इति नकारादिः संयोगः ॥ ॥ ९ ॥

॥ इति द्वितीयः पादः ॥

56—1	नकारस्य विसर्जनीयः	नकारस्य विसर्जनीयः ॥
		Examples ... ... ॥ १० ॥
57—2	नकारस्य रेफः	नकारस्य रेफः ॥
		तक्मँस्तावानस्युद्यँस्तेजाँसि न ग्रँस्ततापोद्यँस्त्वं देव सूर्यैतः सँस्तानि पश्यस्यारोहँस्त्रिदिवं दिव इत्यतोऽन्यत्र
58—3	ह्रस्वोपधस्य तवर्गे प्रकृत्या	ह्रस्वोपधस्य तवर्गे प्रकृत्या ॥
		तवीयान्तपसा चिकित्वान्त्वं दूतो देवान्तां त्वाछावदामसि वि शत्रून्ताढि जनान्दंहन्तमृषीन्तपस्वतो यम विवस्वान्न
59—4	दीर्घोपधः सप्तधातु विसर्जनीयस्य	इति दीर्घोपधः ॥

		सप्तधातु विसर्जनीयस्य लोपः ॥
60—5	यथापरु समासे सकारः कपयोः	समासे सकारः कपयोः । अनन्तस्तस्यापवादः । अन्तः- कोशमिवान्तःपात्रे रेरिहतीं सद्यःक्रीः श्रेयःकेतः छन्दःपक्षे परःपर इति ॥
61—6	पञ्चम्याः परौ	पञ्चम्याः परौ परतः सकारः । तस्यापवादः । पुमान्पुंसः परिजातः प्राणमङ्गेभ्यः पर्याचरन्तं ततः परि प्रजातेन वनस्पतिभ्यः पर्याभृतं सहः पृदाकोः परि संभृतमघायोः परिपन्थिनः विश्वतः परिभूरसि दिवस्पृथिव्याः पर्योज उद्भृतं बृहतः परि सामानि वायोः पर्यात्मोत्क्रामातः परि ॥
62—7	विसर्जनीयस्य सकारः	विसर्जनीयस्य सकारः ॥
63—8	षत्वस्यापवादः	षत्वस्यापवादः । तैस्त्वं पुत्रं वाध्रिस्त्वं पवस्तैस्त्वाददुस्तुभ्यं रश्मिभिस्त्वं मन्युस्ते रयिस्ते मणिस्ते पृथुस्ते स्तनयित्नुस्ते तावतीस्तुभ्यं प्राचीस्त्वं पतिस्त्वमिन्द्राकुभिस्तव श्रवस्यु- स्त्वं द्यौस्तव गृहपतिस्तव दिधिषोस्तव ॥
64—9	अनुपसर्गात्षकारः	अनुपसर्गात्षकारः ॥
65—10	पूर्वपदात्	पूर्वपदात्षकारः ॥
		Examples ... . ॥ ११ ॥
		इदमू षु तदू षु पर्यू षु महीमू ष्व १ न्य ऊ षु स्तुष ऊ षु त्यमू षु पर ऊ त एकम् ॥
66—11	उपसर्गस्योत्तरपदे दीर्घः	उपसर्गस्योत्तरपदे दीर्घः ॥
67—12	अनिङ्गयेषूत्तरपदे दीर्घ इङ्गयेषु च	नीहारादिष्वनिङ्गेषूत्तरपदे दीर्घ इङ्गेषु च ॥
68—13	अभ्यासस्य दीर्घः छन्दसि	अभ्यासस्य दीर्घश्छन्दसि ॥
		Examples ... ... ॥ १२ ॥
69—14	अश्वादीनां मतौ	अश्वादीनां मतौ दीर्घः ॥
70—15	सर्वलिङ्गवचनेषु च	सर्वलिङ्गवचनेषु च ॥
		Examples ... . ॥ १३ ॥
71—16	प्रथमस्य	प्रथमस्य दीर्घः ॥
		Examples . . .. ॥ १४ ॥
72—17	द्वितीयस्य	द्वितीयस्य दीर्घः ॥
73—18	सात्रासाहादीनामुत्तरपदाद्यस्य	सात्रासाहादीनामुत्तरपदाद्यस्य दीर्घः ॥ निलोपे बहुलं ह्रस्वो निलोपे बहुलमिति । अन्येषां दृश्यते दीर्घः स समापाद्यते पुनः ॥
74—19	नामेत्यस्य ह्रस्वान्तमसमासे	निहिता सप्त नामा इति । अतोऽन्यत्र नामेत्यस्य ह्रस्वान्त- मसमासे ॥ नामा विश्वरूपो नामावीरघ्नीरिति ॥ ॥ १५ ॥ अकारे जनिमा पूर्वं दीर्घत्वं यत्र दृश्यते । असमासेऽपि सर्वत्र ह्रस्वेन विभजेत्पदम् ॥

समानाक्षरदीर्घान्तमाख्यातं नैव विद्यते ।
सांहितं यत्र दीर्घत्वं ह्रस्वेन विभजेत्पदम् ॥
अकारान्तानि प्रैषण्या मध्यमस्यैकवचनानि ।
नैगमी तकाराबाधे ॥

75—20 निपाताव्ययानामुत्तरपदाद्यस्य

निपाताव्ययानामुत्तरपदाद्यस्य दीर्घः ॥

॥ इति तृतीयः पादः ॥

अधेति व्यञ्जने दीर्घौ वर्जयित्वा त्यं धीः परम् ।
स्वरादावथ सर्वत्र व्यञ्जने ह्रस्व एव तु ॥
एवेत्येव तु दीर्घान्तं पादादौ यत्र दृश्यते ।
Examples ... . ॥ १७ ॥
समासेऽवग्रहः शिष्टः पदकारेण शास्त्रतः ।
समुद्रादीनां प्रतिषेधो युवत्यादिषु तद्धिते ॥
विभक्तौ यत्र नेष्यते पदात्पूर्वादवग्रहः ।
तद्वक्ष्यामि यथाम्नातमाचार्यैः शास्त्रबुद्धिभिः ॥
रूढिशब्दार्थसंज्ञा ये नेङ्ग्यन्ते ककुभादयः ।
तच्छास्त्रं शब्दमित्यर्थं यथासूत्रे निपातितम् ॥
संदेहाद्वर्णलोपाच्च व्यत्ययान्नावगृह्यते ।
इकारात्परपूर्वयोरनीचो कारणं (?) स्मृतम् ॥
तसौ मत्वर्थे पदत्वप्रतिषेधेन नेङ्गयेत् ।
प्रापाभ्यामनिगन्तास्त्वञ्चतौ नावगृह्यते ॥
सर्वनाम्ना दृशश्चैव परिमाणे च यो विधिः ।
उपसर्गेभ्यो धोपनतेस्तु युवत्यादींश्च नेङ्गयेत् ॥
प्राणोऽपानति वोदितः प्रापाभ्यां दीर्घसंशयात् ॥
Examples ... ... ॥ १८ ॥

76—1 अञ्चतौ लुप्तप्रत्यये नेङ्ग्यते

अञ्चतौ लुप्तप्रत्यये नेङ्ग्यते ह कदाचन ॥
इष्टापूर्तं पितापुत्रौ हंसासुदौ द्यावापृथिवी द्यावाभूमी उषा-
सानक्तैकादशो द्वादश षोडशी शोडशिनमहोरात्रे शुना-
सीरा यज्ञायज्ञियं सूर्यामासयोः ॥ ॥ १९ ॥
समुद्रोऽभिष्टये किमीदी जरायु हारिद्रवेषु निर्हः स्थपतिः
सौत्रामण्योदारथिं मानस्था (?) गोपा गोपीथश्चन्द्रमाः
कृकवाकावुभयादन्नुभयादति सीमन्तमसमार्ति शीर्षक्तिं
परशुरोषधयः पड्वीश आज्यमनुष्टुप् ।
काहाबाहमदोमदमश्वत्थो न्यग्रोधाः कश्यपो विश्वामित्रो
गविष्टिरं मुद्गलं विश्वानरे वैश्वानरो विश्वाहा विश्वहा
नराशंसो वराहोऽप्सरसो गन्धर्वौ रुशती कालकाञ्जा

अङ्कुशो मध्यंदिनं शिंशुमारा अजगराः पुलीकयाः शाङ्खो-
ऽलिक्लवा जाष्कमदाः श्वशुरः कुवित्कुषुम्भं कुचरः कुमारः
कुष्ठः कुसूलाः कुनाखिना कुकुंधाः कुकूरभाः कूपे कुबेरोऽ-
कूपारः कुसिन्धं कुहूः कुष्ठिकाः कुम्भः ककुभा करुमाः
स्त्रिमाः कूरमपामार्गः प्राणाहस्य प्रावृता प्राशं प्रति प्रेयसी
प्रत्न आध्र आण्ड्यौ, आघृणिराहनसमायुधमातुरमा-
पितमामनसमामित्रार्यमाघाटाः श्टङ्गादाभूकमाखुमासक्ति-
रातिरात्र्यै आशीविष आहनो व्याघ्रो विष्टारी विष्टपं
विष्टम्भा विषूची विष्वक् विषं विषूचो विपूचीनान् वीध्रे ॥ २० ॥
विह्वला अविधवा विप्रो वीरुधो विवस्वान्विवस्वते दुरोणे
दुच्छुना दुराहा दूरं दुष्टरं दुरदभ्ना दुहिता दुर्यान् सूनृता
सूकरः स्वसा स्वाहा सूषा व्यूर्णोतु रिशादाः सुरभि आ
सुष्वयन्ती स्वस्ति स्वसराणि स्वावृगभीशुनाभीवर्णं मही-
यतेऽनूकयमन्तकयानूषुष्पराचं पराचीना निष्का निष्टयो
नीलं नीचीनस्य नीचो नीचीनीहारः प्रेण्योऽवर्त्तिरवरा-
वरेऽवरमपरापरेऽपरमवमावमेऽवममपाश्वमपाष्ठादपाश्वो
यन्त्ववाचीनमवाचीनानुपभृदुपब्दैः पयस्यं संस्कृतत्रं
संस्कृतं परिष्कृता विश्पतिर्विश्पत्नी जास्पत्यमतस्करं
तस्करो वनस्पतिर्बृहस्पतिः प्रायश्चित्तं प्रायश्चित्तिम-
प्रतीत्तं परीत्तः प्रत्तमवत्तामुद्धत उद्धिता उद्ध्रियमाणो-
द्धृता उद्धृतेषूत्तभिता उत्थातुरुत्थितः श्वाविद्धृदयाविधं
मर्माविधं प्राषाट् तुराषाट् पृतनाषाट् शत्रूषाण्महीषा-
डभीषाडसि विश्वाषाट् ॥ ॥ २१ ॥
येषां शास्त्रेण नेष्यते पदानां क्वचिदिङ्गनम् ।
आबाधायाद्य (?) दृष्टत्वात्पठितानि परीवृतात् ॥
अरपा अद्भुतोऽन्येद्युरनवद्याभिर्मगुन्धाः शेरभक शेरभ
शेवृधक शेवृध सिनीवालि स्तरीतवे मथायति कर्मारा
अलुभ्यतः करम्भं पतित्वानुषगराटक्युपमस्य मातरि-
श्वरी समह वृष्ण्यमसश्चतो भूर्णयः सक्षणिः श्मश्रूणि
सनिस्रसो मनुष्यद्येवाषासः कष्कषासो नदनिमा तता-
महाः पितामहाः शपथेय्यं साहन्त्य पुंसि नीलागलसाला
सखुषीररगराटेषु स्थूलभं समाभ्योऽसत्यासनि गोधा
मेधा स्वधा श्रद्धा त्रेधा श्वापदं शितिङ्गो वलगः पतङ्गः
पण्डगाः सारङ्गं पिशङ्गं पिङ्गो भृङ्गाः हरिमाणं जरिमा
महिमानं वरिमत इदावत्सराय पुरोडाशौ परमामन्तितम् ॥
कार्षीवणा एत्सैमानो दुन्दुभिः शांशायेन पत्तत औपशिन-
मदितिर्जनित्वमोण्योः सभा नरिष्टा सर्वीमनि दमूना

नूतनं समीचीः कितवान्सहस्व ममत्तन कलशे शाङ्कुरस्य पलीजकम् ॥
गोपायन् कुक्षिला उरुण्डा ये च मट्मटाः तुण्डेलमुदुम्बलमयाशवोऽघलाः सरमायै सध्रीचीः सभागयति रेवतीरनामया अलजेः सप्तथमुत्तानायां कसर्णीलं दशोनसिमसूस्व उलूखलमर्बुदिः करीकरं पटूरावघारिणीः ॥ ॥ २२ ॥
शर्फकः सारथिः सहुरिः शिखण्डिनो जीमूताः पतत्रिणो मुद्गलं मातरिश्वा मधुलालसाला शिलाञ्जाला तलाशा मदुघान्मधूलकमसभ्यं मेखलां यजत्रा गोत्रस्योलपेषु कम्बूकान्महीलुका कम्बले मन्दसाना गव्यूतिर्बहुलान् ककाटिकां लाङ्गलं नालानमुलुलयः सूर्यो वृषभो गर्दभे पर्जन्यः सारमेयौ सोमर्यचनानाः कसाम्बु कुकाटं वंसगः शरदो रिशादा मर्यादाःपादो मगधेभ्यः कबन्धं रिशादसो नलदी पलदानां मागधस्तिलिपिञ्जं कूल्बजं बल्बजं लिबुजा चीपुद्रुः पूतुद्रुरंसद्रीं मिथुयामुया भद्रया उर्विया सनेयं समनं सखा सख्युः सहुरिः सदान्वाः सनातनममम्रिः सद्रुः सरण्यूर्गोतमः कतरः कतमो यतरा यतमोऽश्वतरस्याश्वतर्यः प्रातरुच्चा उच्चैर्नीचैः पराचैरपाचैः चतुष्टयं सदं सदा सर्वदा मध्यंदिनः कक्षीवानष्ठीवानष्ठीवन्ताविप्रजस्तामस्वकता पुरुता करता जनता देवता द्वयाविन उभयाविनमामयाविनमामयावी मेखलावी मेधावी ध्रुवमयो जिगीवान् ददावाँश्चिकित्वान्विद्वान् ॥ ॥ २३ ॥
समन्तः सर्वतोऽर्थेऽन्तोदात्तं नावगृह्यते ।
आद्युदात्तमवगृह्यते पूरणार्थे ॥
समानमस्मिन्को देव इत्येतदेवावगृह्यते ।
अतोऽन्यानि समानानि नेङ्गयेत्सर्वदा कविः ॥
अधमावयमावयमित्येतदेवावगृह्यते ।
अतोऽन्यानि नावगृह्यन्ते ॥
अभिधावाम्याशामाशिष्येतदेवावगृह्यते ।
अतोऽन्यानि आद्युदात्ता(नि) दिगर्थे नेङ्गयेदसौ ॥
उतोत्तरस्मादिति च इत्येतदेवावगृह्यते ॥
उत्तरस्यां दिश्युत्तरं धेहि पार्श्वे सिलाञ्जालास्युत्तरा उत्तरादुत्तरो हंस्युत्तरस्मिन्त्समुद्रे पूर्वस्मादुत्तरं समुद्रम् ॥
अतोऽन्यान्यवगृह्यन्ते ॥
आयन्नित्यन्तोदात्तं यत्र दृश्येत नामवत् ।
आकारेणावगृह्णीयादायन्न चन्द्रमः ॥
आख्यातमाद्युदात्तमनुदात्तं वा यदा भवेत् । तन्नाव-

गृह्णीयादार्यन्नेकाक्षरमायन्ताः संप्तगृध्राः ॥ ॥ २४ ॥
अकारान्मानशब्देऽपि परतो नावगृह्यते ।
यजमानः पवमानो वर्धमानो निदर्शनम् ॥
स्वरात्कशब्दे नेङ्गयेत्तुण्डिकः शिपवित्नुकाः ।
छायकादुत नग्नकाच्छकाद्वियादत्र निदर्शनम् ॥
अनुदितामुदिता स समुंद्ये (?) उद्यमानमुदिना प्रसारिणा।
वदिः ॥
अतिष्ठिपमातित्रसन्नर्पपुपोऽववृत्रन्नभ्यस्तात् । तस्यैव । .
नोपसर्गः ॥
अवद्यम् । वदिप्रतिषेधः । अनुद्यम् ॥
विदथे विदेः । वेदनम् । नोपसर्गः ।
विदेरेव । सहसा विदानो लोकं विदाने विद्युमें विद्युतम् ।
नोपसर्गः ॥
वित्त्वा विदेष्ट विद वित्ता । अपस्पृधेथामानृचुर्गानशाना
आजिमाशुरायोराद्यमनाद्यमिति धात्वादि दीर्घोपधम् ।
नोपसर्गः ॥
अचिक्रदत्कनिक्रदच्छाशदानः शाशाद्यमानः शाशयुः
शिश्रियाणो दविद्युतत्तरीतृतं करीकृशं विद्युषीर्जिज्यां-
सतः सरीसृपं वरीवृजं मरीमृशामविद्युतदित्यभ्यस्ता
धातवः । नो समासः ॥ ॥ २५ ॥

77—2 देवताद्वन्द्वे दीर्घाद्भिर्भ्यांभ्यःस्सु
देवताद्वन्द्वे दीर्घाद्भिर्भ्यांभ्यःसु ॥
सौ च ॥
सकारे विनतेऽन्यतोऽपि अग्निष्वत्र निदर्शनम् ॥

78—3 समस्तमेकाक्षरं वृद्ध्या
समस्तमेकाक्षरं वृद्धया यद्भवेद्विकृतं पदम् ।
स्वरात्तन्नावगृह्णीयाच्छाकल्यस्य तथा मतम् ॥

79—4 एकाक्षरमवर्णान्तम्
एकाक्षरमवर्णान्तं यद्भवेन्नञ उत्तरम् ।
तत्पदं नावगृह्णीयादप्रयावादिवर्जितम् ॥
सारथिर्विथुरो व्यथिर्व्यचः स्वतो नकुलो नखं नपात-
मोपशः ॥
पनिष्पदा पनिप्नतं वनीवजताद् वरीवर्जयन्ती चराचरः
खनित्रिमाः कृत्रिमः पूत्रिमम् ॥

80—5 स्वरलिङ्गस्वरविभक्तिवचनविशेषेषु
स्वरलिङ्गस्वरविभक्तिवचनविशेषेष्विति यावद्वा ॥

81—6 वर्णलिङ्गस्वरविभक्तिवाक्यव्यत्यय-श्छन्दसि
शास्त्रे पुराणे कविभिर्दृष्टमेतत् वर्णलिङ्गस्वरविभक्तिवाक्य-व्यत्ययश्छन्दसीति ॥

82—7 वर्णलोपागमह्रस्वदीर्घप्लुत-आत्मने-भाषा-परस्मैभाषा अपियन्त्यपियन्ति
वर्णलोपागमह्रस्वदीर्घप्लुत आत्मनेभाषाः परस्मैभाषा अपियन्ति ॥

न तर्कबुद्ध्या न च शास्त्रदृष्ट्या,
यथाम्नातमन्यथा नैव कुर्यात् ।
आम्नातं परिषत् तस्य शास्त्रं,
दृष्टो विधिर्व्यत्ययः पूर्वशास्त्रे ॥
आम्नातव्यमनाम्नातं,
प्रपाठेऽस्मिन् क्वचित् पदम् ।
छन्दसोऽपरिमेयत्वात्,
परिषत्तस्य लक्षणं परिषत्तस्य लक्षणमिति ॥

॥ इति चतुर्थः पादः ॥

॥ इति तृतीयः प्रपाठकश्च ॥

अथर्वप्रातिशाख्ये तृतीयः प्रपाठकः समाप्तः ॥
इति प्रातिशाख्यं मूलसूत्रं समाप्तम् ॥

आथर्वणे संहितालक्षणग्रन्थे प्रातिशाख्य-
मूलसूत्रं समाप्तम् ॥

सं० १६६८ वर्षे, द्वितीय आषाढ वदि ६ षष्ठी, भृगुवासरे ॥
लेखकपाठकयोः शुभं भवतु ॥ राम ॥ राम ॥ राम ॥

अथर्वप्रातिशाख्यम्

॥ ॐ नमो ब्रह्मवेदाय[1] ॥

[प्रथमः प्रपाठकः]

ॐ नमस्कृत्य ब्रह्मणे शंकराय । ऋषिभ्यः पूर्वेभ्यः । शमु वाचास्तु मे गीः ।
प्रज्ञां ब्रह्ममेधां तपश्चादिश्याद्ब्रह्मा यशसं मा कृणोतु ॥

1 ॥ अथातो न्यायाध्ययनस्य पार्षदं वर्तयिष्यामः ॥ १ ॥

अत्रोच्यते । य इमे त्रयो न्यायाः क एषामाद्यो न्याय इत्यत्राह :—

2 ॥ पदानां संहितां[2] विद्यात् ॥ २ ॥

तन्तूनां यथा तन्तूनां वासो यथा दारुशिलामृदां प्रासादस्तथा च संधिशास्त्राणि
मांग पदसंधानार्थं प्रोक्तानि । माङ्गलिकस्त्वाचार्यो मध्ये पदं न्यायं प्रोवाच । अथ किं-
प्रयोजनोऽयं पदविधिः । ननु चोक्तम् :—

3 ॥ समर्थः पदविधिरिति[3] ॥ ३ ॥

3b इहापि वक्ष्यति :—

ऋषिप्रोक्तमन्त्रादिशब्दस्वरज्ञानार्थः पदविभागः ।

padādhyayanam antādiśabdasvarārth-ajñānārtham IV 107

3c तदिदं शास्त्रं व्याकरणं पुरस्तादध्येयमलंविज्ञानाय । आम्नायदार्ढ्यार्थम् ।
शाखान्तरेष्वन्यथा निगदत्वात् । समानशब्दानां स्वरान्यत्वाद्वर्णान्यत्वाच्च । कानि
3d पुनरस्य प्रातिशाख्यस्य प्रयोजनानि ?
वक्ष्यति :—

वत्व० एतावत्त्वमपवाद आबाधश्चार्थशब्दतः ।
पंच सांवेदनं न्यायमुखं पञ्चस्वर्थेषु वर्तते ॥

पच पञ्चार्थसंनिवेशाद्गम्यते पञ्चैव प्रयोजनानीति ।

॥ १ ॥

---

1 Omitted in V, P, Vr has ओं नमो अथर्ववेदाय, Al and Ṣ ओं नमो श्रीब्रह्मवेदाय 2. V संहितां, Ṣ सहित.
3 P. पदविधरिति ।

वत्व—3e अथ कीदृगेतावत्त्वं नाम ?

यत्रैतानि पदान्येवमादिष्वेवं भवन्त्यतो नान्यथेति ।

तद्यथा :—

इच्या० पूषा त्वेतश्च्यावयतु प्र विद्वान्—१८. २. ५४ = X. 17. 3.

अत्र च प्र विद्वान् विगृह्यते । समासोऽन्यत्र । किं कारणम् ? प्रेत्यस्य[1] च्यवतिना सामर्थ्यम् । पूषा[2] त्वेतः प्रच्यावयतु विद्वान् इति ।

कर्मन्ता [3]कर्मन्कर्मन्नाभगम्—कर्मन्ऽकर्मन् । आऽभगम् ४. २३. ३.

आभगम् इति समस्यते । विग्रहोऽन्यत्र । किं प्रयोजनम् ? कर्मणि कर्मण्याभगम् ।

अधिश्रितेऽग्निहोत्रे—अधिऽश्रिते । अग्निऽहोत्रे १५. १२. १.

अधिशब्दस्य श्रितशब्देन[4] सह समासः । विग्रहोऽन्यत्र । कस्मात् ? कर्मप्रवचनीयत्वात् ।

3f अपवादो नाम :—

तन्यायाच्छ यत्रैतन्न्यायाच्छब्दा अन्यथा निगदा भवन्ति ।

यो बिभर्ति दाक्षायणं हिरण्यम्—बिभर्ति १. ३५. २ = RVKh. X. 128. 8

द्वितीयवेलायाम् इति प्राप्ते आदिरुदात्तो भवति ।

हींस्ते हिंस्ते अदत्ता पुरुषम्—अदत्ता १२. ४. १३.

अंन्त अन्तवेलायाम् इति प्राप्ते आदिरुदात्तो भवति ।

3g आबाधो नाम :—

तच्छ यत्रैतच्छब्दार्थतस्तुल्या संहिता भवति ।

अवकादान्—अवकाऽअदान् ४. ३७. १०.

गर्भादं कण्वं नाशय—गर्भऽअदम् २. २५. ३.

अन्नादीः—अन्नऽअदीः १५. १४. ३, ६.

भि. on the mar. अन्नादीभिः—अन्नऽअदीभिः १५. १४. ३, ६.

अन्नादम्—अन्नऽअदम् १५. १४. १, २, ७-१२.

कर्मोपपदो वृद्धिमानकारप्रत्ययः, सोऽयमिति मन्येत । अकाराद्युत्तरं[5] पदम् ।

व्यज व्यञ्जनान्तात्तथान्यत्र[6] :—

हविरदान् (हविःऽअदान् ४. ३७. ८, ६) इति ।

खांत शाखान्तरेऽपि :—

तन्नस्तपं उत सत्यं च वेत्तु—तम् । नः ; cp. 140c ; तत् नः in Śaunaka's school ; १२. ३. १२.

अकारान्तं पुंसि वचनम् । नपुंसकं तकारान्तं शौनके[7] ॥

prathamāntāni tṛtīyāntānīti śaunakasya pratıjñānm na vṛttih 1. 8

॥ २ ॥

1. Vn. प्रस्य च्य- . 2. Vn. पूषां त्वेत प्रत्यावयतु 3. Vn. omits first कर्मन्. 4. Vn. श्रुतशब्देन. 5. Vn. द्युत्तरपद. 6. Vn. -त्ततथा. 7. Vn. मोदक.

3h सांवेदनं नाम :—

भवन्ति याछ

यत्रैतन्न्यायाच्छब्दा अल्पशो निगदा भवन्ति ।

ज्येष्ट

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः—ज्येष्ठम् ५. २. १=X. 120. 1.

ज्येष्ठशब्दस्य आदिरुदात्तो भवति । श्रेष्ठ इत्यस्मिन्नर्थे । अन्तोदात्तमन्यत्र ।

पूर्वजात इत्यस्मिन्नर्थे ।

उतैषां ज्येष्ठ उत वा कनिष्ठः (ज्येष्ठः १०. ८. २०.) इति ।

आखरे कृष्णा इषिरा[1] अनर्तिषुः—कृष्णाः ६. ४६. ३=X. 94. 5.

वर्ण्ण

कृष्णशब्दस्य आदिरुदात्तो भवति मृगाख्यायां चेद्भवति । अन्तोदात्तमन्यत्र वर्ण इत्यस्मिन्नर्थे ।

कृष्णं नियानम् (कृष्णम् ६. २२. १=1. 164. 47) इति ।

न्यायमुखं नाम :—

3i

आम्नायो न्यायाधिगतः । वक्ष्यति :—

"नकारस्य विसर्जनीयः"[2];

"नकारस्य रेफः" इति ।

इदं चापि :—

उतामूं द्याम् (उत । अमूम् ४. ३०. ७=X. 125. 7) इति ।

—कारांताना —नामकारान्ता- नामियतां ?

उकारोपधानां मकारान्तानां मीयतां (?) गणादिः[3] ।

On the margin

4 ॥ द्विरुदात्तं बृहस्पत्यादीनाम्[4] ॥ ४ ॥

बृहस्पतिः २. १३. २ ; about 93 times.

शचीपतिः ३. १०. १२.

तनूनपात् ५. २७. १.

द्यावापृथिवी २. १. ४ ; about 65 times.

उषासानक्ता ५. १२. ६.

देवाश्विना ६. ३. ३.

मित्रावरुणौ ४. ३६. ७ ; about 16 times.

अग्नीषोमौ ३. १३. ५ ; ८. ६. १४ ; अग्नीषोमा ६. ६३. ३ ; अग्नीषोमाभ्याम् १२. ४. २६.

प्रत्यचामुपोत्तमौ द्वौ उदात्तौ भवतः on the margin

—अजुषिपरे—

प्रत्य

5 ॥ प्लुतानामादितस्त्रीणि प्रत्यश्चां द्वे उपोत्तमे[5] ।

षा

तवैषान्तं च यावद्वा नराशँसो वनस्पतिः ॥ ५ ॥

1. Vn. इयिरा. 2. Vn. repeats नकारस्य वि– 3. After गणादिः Vn. reads बृहस्पतिः शचीपतिस्तनूनपाद्यावापृथिवी उषासानक्ता दैवाश्विना मित्रावरुणावग्नीषोमावजुषि पर प्लुतानामादितस्त्रीणि प्रयंचां द्व उषात्तमनवेयंत च षावद्धा नराशँसा बृहस्पतिः एकोदात्त पदमेकस्वरिते चानुदात शेखो द्विरुदात्त बृहस्पत्यादीनामामन्त्रितस्वरेणं अजुषि परावितिं किमर्थं या अग्नीषोमानजुष सखाया. 4. Al. and Vr combine 3-4 into one. 5. Vn तुपोत्तमे.

[नराशंसः ५. २७. ३ ; वनस्पतिः ४. ३. १ ; about 35 times.]

मन्त्रित एकोदात्तं पदम् । एकस्वरितं च । अनुदात्तं शेषम् । आमन्त्रितमामन्त्रितस्वरेण ।

अजुषिपराविति[1] किमर्थम् ?

यो अग्नीषोमावजुषे सखाया (अग्नीषोमौ ६. ६१. ३) इत्यन्तोदात्तः ॥

॥ ३ ॥

6 ॥ अवर्णमध्य[2] आकार एकादेशे विशेषः ॥ ६ ॥

*स च उदात्तेन सह एकादेश उदात्तो भवति on the margin

स्वरकृतोऽनुपलब्धः सर्वैर्विज्ञानस्यातुल्यत्वात्* ।

१ भगेनाहं सहागमम्—सह । आ । अगमम् २. ३०. ५.

२ हविषाहार्षमेनम् (-षा । आ । अहा- ३. ११. ३, ४=X. 161. 3) इति द्वे ।

ह्यास्यादिषि — ३ आजामि त्वाजन्या—त्वा । आऽअजन्या ३. २५. ५.

४ विषं ह्यस्यादिषि—अस्य । आऽअदिषि ७. ५६. ५. — C. adisi, √dā 'to cut'

५ यदा मागन्प्रथमजा ऋतस्य—मा । आऽअगन् ६. १०. १५. — RV I 164 37 ā́ ágan

६ अभ्यक्ताक्ता— ०अक्ता । आऽअक्ता १०. १. २५.

७ ब्रह्मणापीपदाम तम्—ब्रह्मणा । आ । अपी- १०. ५. ४२.

पूर्णो म- — ८ पूर्णो मन्थेन मागमत्[3]—मा । आ । अग- १०. ६. २.

९ वत्सं गायत्रीमनु ता इहागुः—इह । आ । अगुः १३. १. १०.

तन्नो स्माकमिति षट् — १० तं नो गोपायतास्माकम् (-यत । आ । अस्माकम् १२. ३. ५५-६०) इति षट् ।

११ सूर्यारोहत्प्रयती पतिम्—सूर्या । आ । अरोहत् १४. १. १२=X. 85 12.

अवर्णांतच्च

7 ॥ अवर्णान्ताच्च[4] ॥ ७ ॥

अवर्णांताच्च पदं is crossed

अवर्णान्ताच्च आकारः परः पदं पठ्यते । किं कारणम् ? ह्रस्वस्य दीर्घदृष्टत्वात् ।

ताविहावह — १ ताविहा वहताम्—तौ । इह । आ । वह- ३. २४. ७.

फेनमिवावह- — २ नदी फेनमिवा वहत्—फेनम्ऽइव । आ । वहत् १. ८. १.

३ सजातानुग्रेहा वद—उग्र । इह । आ । वद् १. १०. ४.

४ इन्द्र जुषस्व प्र वहा याहि शूर—प्र । वह । आ । याहि २. ५. १.

५ द्यावापृथिवी अनु मा दीधीथाम्—मा । आ । दीधीथाम् २. १२. ५.

६ विश्वे देवासो अनु मा रभध्वम्—मा । आ । रभध्वम् २. १२. ५.

कर्मणा — ७ इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु—०कर्मणा । आ । यन्तु २. ३५. ५.

---

1. The reading of the text was—जुषिपराविति किमर्थं । यो अग्नीषोमावजुषे सखाया । But this was crossed and the reading adopted here was put down on the margin. 2. Vn अवर्णम आकार एकादेशः विशेषः. 3 Vn मागत 4 Vn रोहन्. 5 Vn. अवर्णान्ताच्च उदात्तेनाकारेण सह एकादेश उदात्तो भवति on the margin.

Repeated तारविहा वहताम्—३. २४. ७.

तानय ८ धनुरिवा तानया परः—धनुः ऽइव । आ । तानय ४. ४. ६.

नामा ९ महत्तद्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ—नाम । आ । वि- । तस्थौ ४. ८. ३ = III. 38. 4. — C mahastad—

छि १० नडमिवा छिन्धि—नडम् ऽइव । आ । छिन्धि ४. १६. १.

११ इति त्वा रभ ओषधे[2]—त्वा । आ । रभे ४. २०. ६.

१२ धास्युर्योनिं प्रथम आ विवेशा[3] यो वाचमनुदितां चिकेत—विवेश । आ । यः । चिकेत ५. १. २.

इ १३ इन्द्रा याहि मे हवम्—इन्द्र । आ । याहि ५. ८. २.

इ १४ अनु त्वेन्द्रा रभामहे—त्वा । इन्द्र । आ । रभा- ५. ८. ६. — W. indrára—

व १५ वन्यश्चा याहि—च । आ । याहि ५. १२. ३ = X. 110. 3.

१६ अग्निर्होता हस्तगृह्या निनाय—हस्त ऽगृह्य । आ । निनाय ५. १७. २ = X. 109. 2.

पूर्ण १७ सरौ[1] पर्णमिवा दधत्—पर्णम् ऽइव । आ । दधत् ५. २५. १.

१८ एवा[4] दधामि ते गर्भम्—एव । आ । द- ५. २५. २.

१९ गर्भं ते अश्विनोभा[5] धत्ताम्—अश्विना । उभा । आ । धत्ताम् ५. २५. ३ = X. 184. 2.

२० प्रजायै त्वा नयामसि—त्वा । आ । नया- ५. २५. ८.

२१ अश्विना ब्रह्मणा यातम्—ब्रह्मणा । आ । यातम् ५. २६. १२.

२२ बृहस्पते ब्रह्मणा याह्यर्वाङ्—ब्रह्मणा । आ । याहि । अर्वाङ् ५. २६. १२.

ब्रह्म २३ आ त्वा चृतत्वर्यमा[6] पूषा बृहस्पतिः—आ । त्वा । चृततु । अर्यमा । आ । पूषा । आ ५. २८. १२.

अंशु २४ अंशुरिवा प्यायतामयम्—अंशुः ऽइव । आ । प्या- ५. २६. १२.

२५ अपथेना जभारैणाम्[7]—अपथेन । आ । जभार । एनाम् ५. ३१. १०.

२६ सुनोता च धावत—सुनोत । आ । च धा- ६. २. १.

२७ तेना नोऽवसा गहि—तेन । नः । अवसा । आ । गहि ६. ७. १.

इति त्रीणि । भजता २८ अनु त्वा रभे (त्वा । आ । रभे ६. ४८. १-३) इति त्रीणि ।

२९ आ नो गोषु भजता प्रजायाम्—भजत । आ ६. ५५. २.

३० वचसा वेशयामहे—वचसा । आ ६. १०८. ५.

३१ तेभिः सुम्नया[8] धेहि नो वसो—सुम्न ऽया । आ । धेहि ७. ५५. १. — sumnayá falls under IV 30, which prescribes separation of yā in the Pada

३२ वृषणा वृषेथाम्—वृषणा । आ । वृषे- ७. ५८. २ = VI. 68. 11.

३३ तस्य त्वं प्राणेना प्यायस्व—प्राणेन । आ । प्या- ७. ८१. ५.

---

1. Vn. नडमि. 2. Vn. त्वारतनुष. 3. Vn. विरवशाया. 4. Vn. एवा इमाश्विनाभार्त्ता. 5. Vn. चानया. 6. Vn. omits अर्यमा. 7. Vn. जभार. 8. Vn. सुम्नयान्वमहि.

३४ स्वस्तये ताक्ष्यमिहा हुवेम—इह । आ । हु- ७. ८५. १; ताक्ष्यम् । इह । हुवेम X 178. 1.

३५ द्विषते त्वा सजामसि—त्वा । आ । सजा- ७. ११५. १. — C sacāmasi

३६ मा त्वा जम्भः संहनुर्मा तमो विदन्मा जिह्वा बर्हिः—जिह्वा । आ ८. १. १६.

३७ मा रभथाः सृजेमम्—मा । आ । रभथाः ८. २. ७.

ताविहा यंतु — ३८ ता इहा यन्त्वोषधीः—इह । आ । यन्तु ८. ७. १०.

यतु — ३९ इहा यन्तु प्रचेतसः—इह । आ । यन्तु ८. ७. ७.

४० अग्निर्गर्भ इवा शये—गर्भःऽइव । आ । शये ९. ३. २१.

४१ अजा रोह सुकृतां यत्र लोकः—अज । आ रोह ९. ५. ९.

४२ स मा धीरः पाकमत्रा विवेश—अत्र । आ । वि- ९. ९. २२=1. 164. 21.

४३ कस्तद्वां मित्रावरुणा चिकेत—रुणा । आ । चि- ९. १०. २३=1. 152. 3.

ब्रह्मा — ४४ ब्रह्मा विवेश—ब्रह्म । आ । वि-१०. २. ३३. — brahmā TA. 1.27 3 4

४५ तेना रभस्व त्वं शत्रून्—तेन । आ । र- १०. ३. १.

४६ प्रैणां छृणीहि प्र मृणा रभस्व—प्र । मृण । आ । र- १०. ३. २.

४७ तस्मिन्घृतस्तावो मृष्ट्वा त्वमग्ने दिवं रुह—मृष्ट्वा । आ । रुह १२. २. १७.

स्व नुदा देव — ४८ निः क्रव्यादं नुदा देवयजनं वह—नुद । आ । वह १२. २. ४२.

४९ प्र यच्छ पर्शुं त्वरया हरौषम्—त्वरय । आ । हर । ओ- १२. ३. ३१.

५० चरेदेवा त्रैहायणात्—एव । आ १२. ४. १६.

विशतु — ५१ तास्त्वा विशन्तु मनसा शिवेन—त्वा । आ । वि- १३. १. १०=TB.II.5.2.2.

५२ कृत्यैषा पद्वती भूत्वा जाया विशते पतिम्—भूत्वा । आ । वि- १४. १. २५. — bhūtvyā RV X. 85 29

पशुभ्य आ वृश्च्यते — ५३ पशुभ्यश्चा वृश्चते—पशुऽभ्यः । च । आ । वृ-१५. २. २.

५४ क्षत्राय ना वृश्चते—न । आ १५. १०. २.

५५ राष्ट्राय ना वृश्चते—न । आ १५. १०. २.

8 ॥ इकारादौ[2] च ॥ ८ ॥

(a) ekādeśa udāttenodāttah III 66, examples as marked here
(b) trīni padāny aprktamadhyāni IV 113, examples as marked

अवर्णांतात् — स्वरसंधितुल्यत्वात् । इकारादौ च अवर्णान्तात्पर आकारः परः पदं पठ्यते[3] । किं कारणम् ? स्वरसंधितुल्यत्वात् ।

धियेहा नः—धिया । आ । इहि । आ । नः २. ५. ४. — Quoted in CCA III 38, IV 113-115

स्वेंद्र — गिरो मे जुषस्वेन्द्र—जुषस्व । आ । इन्द्र २. ५. ४.

अर्वाङेतेन स्तनयित्नुनेहि—ना । आ । इहि ४. १५. ११.

कुष्ठेहि तक्मनाशन—कुष्ठ । आ । इहि ५. ४. १. — Quoted as an example under III 38

उष्णेन वाय उदकेनेहि—वायो इति । उदकेन । आ । इहि ६. ६८. १. — vāya-uda- is quoted under II. 21, 24; III 35 -kenehi under III 38, 66.

तत्संजाता अव पश्यतेत—सऽजाताः । अव । पश्यत । आ । इत । १८. ४. ३७.

---

1. Vn दुरवम; पृष्ठमात्रा mistaken for र by the scribe. 2. अवर्णांतादुदात्तेनाकारेण सह एकादेश उदात्त स्यादिकारादौ च परे on the margin. 3. Vn. यव्यते

"आकारः केवलः प्रथमं पूर्वेण"

ākāraḥ kevalaḥ prathamam pūrvena III 38, examples the same as here

मॅ इत्युक्तम् । समासे परेण प्रथमं संधीयते :—

मम चित्तमुपायसि—चित्तम् । उपऽआयसि; √ इ १. ३४. २.

यस्य यस्य जायामुपैमि[1]—उपऽऐमि = आ + एमि ६. ११८. ३.

तद्ब्राह्मणं पुनरस्मानुपैतु—उपऽऐतु = आ + एतु ७. ६६. १.

एकादौ

9 ॥ एकारादौ च[2] ॥ ९ ॥

एकारादौ चावर्णान्तात्पर आकारः परः पदं पद्यते[3] । किं कारणम् ?

स्वरसंधितुल्यत्वात् :—

इहैतु सर्वो यः पशुः—इह । आ । एतु १. १५. २.

त्विंद्रि पुनर्मैत्विन्द्रियम्—पुनः । मा । आ । एतु ७. ६७. १.

punar mām aitv in- AGS III 6 8

गृह्णामि हस्तमनु मैत्वत्र—अनु । मा । आ । एतु १२. ३. १७.

॥ ४ ॥

10 ॥ कृदन्ते[4] द्व्युपसर्गे[5] यत्र पूर्वेण विग्रहः[6] ।

न्यूठो अनर्थकः कर्मप्रवचनीयो न्यूढो वा विगृह्यते ॥ १० ॥

१ प्र सुमतिं सवितर्वाय ऊतये[7]—प्र । सुऽमतिम् ४. २५. ६.

रवायता २ अव मन्युँरवायताव बाहू—अव । आऽयता ६. ६५. १.

'We can hardly help emending manyús to dhanús 'bow' in a' W.

३ वि ते[8] मुञ्चामि रशनां वि योक्त्रं वि नियोजनम्—वि । निऽयोजनम् ७. ७८. १.

४ निर्दुरर्मण्यः—निः । दुःऽअर्मण्यः १६. २. १.

W emends to dur-admanyàh

मॅ ५ सं रय्या सं सुभूत्या—सम् । सुऽभूत्या ३. १४. १.

sam su-and sam sa- are cited under II.32.

सॅ ६ एकरूपो भवसि सं समृद्ध्या—सम् । समऽऋद्ध्या १२. ३. २१.

७ अप परेतो अस्मि—अप । पराऽइतः ४. ३२. ५.

८ अप दुर्मतिं[10] हतम्—अप । दुःऽमतिम् १४. २. ६.

हविर्मथीना ९ हविर्मथीनामभ्याविवासताम्—अभि । आऽविवा- ८. ४. २१.

Pet. Lex. treats abhí as if in direct combinatin with participle.

वृंता; सर्पतः १० वृन्तादभि प्रसर्पतः—अभि । प्रऽसर्पतः ८. ६. २२.

C. abhipra—

तंतुमभि सॅवसानौ ११ समानं तन्तुमभि संवसानौ—अभि । सम्ऽवसानौ १२. ३. ५२.

१२ समाकूतीर्नमामसि—सम् । आऽकूतीः ३. ८. ५; MS. II. 2.6.

१३ अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद्दधातु—अप । दुःऽकृतानि ६. ४५. २ = X. 164. 3.

सिंधो १४ आ सिन्धोरा[11] परावतः—आ । पराऽवतः ४. १३. २ = X. 137. 2.

निरू १५ निरुपानसात्—निः । उपऽआनसात् २. १४. २.

1. Vn मुपेमि; पृष्ठमात्रा of ऐ has been left out. 2. अवर्णातादुदात्तेनाकारेण सह एकादेश उदात्तः स्यादेकारादौ च परे on the margin. 3 So ms., cp पद्यते, Vn. यद्युते. 4. Vn कृत्तदते. 5 Vn. द्युपसर्गे. 6. Vn. विगृह', R combines 10-11 into one, P combines 10-12 into one. 7 Vn. प्रसुमवमन्यु 8. Vn. निग्योजन 9. Vn. समृद्ध्या 10. Vn. यमारता अप परेतो० दुर्मनी. 11. Vn. omits धो.

१६ प्रेतो यन्तु व्याध्यः प्रानुध्याः प्रो अशस्तयः—प्र । अनुऽध्याः ७. ११४. २.

व्यार्पि[1] १७ अन्यो अन्यस्मिन्नध्यार्पितानि—अधि । आऽअर्पितानि ८. ९. १९.

१८ उत्प्रजापतिरग्रभीत्—उत् । प्रजाऽपतिः । अग्रभीत् ८. १. १७.

?[2] १९ अनु प्रजापतिर्बुध्यते—अनु । प्रजाऽपतिः ९. १. २४.

२० शरीरेऽधि प्रजापतिः—अधि । प्रजाऽपतिः ११. ८. ३०.

२१ उप प्रशिर्षमासते—उप । प्रऽशिर्षम् १३. ४. २७.

२२ ये पार्थिवे रजस्या निषत्ताः—आ । निऽसत्ताः १८. १. ४६ = X. 15. 2.

निषन्द्य[3] २३ अस्मिन्बर्हिष्या निषद्य—आ । निऽसद्य १८. १. ५९ = X. 14. 5.

सिधु २४ सिन्धुतस्पर्याभृतम्—परि । आऽभृतम् ७. ४५. १.

मगेभ्यः[4] २५ प्राणमङ्गेभ्यः पर्याचरन्तम्—परि । आऽचरन्तम् २. ३४. ५. TS. III. 1. 4. 1.

२६ ततः परि प्रजातेन—परि । प्रऽजातेन ६. ८९. १.

भृतं[5] २७ वनस्पतिभ्यः पर्याभृतं सहः—परि । आऽभृतम् ६. १२५. २ = VI. 47. 27; TS. IV. 6. 6. 6.

२८ पृदाकोः परि संभृतम्—परि । सम्ऽभृतम् ७. ५६. १.

वर्तने २९ पथामनु व्यावर्तने—अनु । विऽआवर्तने ६. २६. २.

पराचीमनु ३० पराचीमनु संवर्तम्—अनु । सम्ऽवर्तम् ६. २९. ३.

अगान्यनुविष्टि ३१ अङ्गान्यनु विष्ठिताः—अनु । विऽस्थिताः ६. ९०. २.

३२ मनसोऽनु प्रवाय्यम्—अनु । प्रऽवाय्यम् ६. १०५. १.

सॅवतम् ३३ पृथिव्या अनु संवतम्—अनु । सम्ऽवतम् ६. १०५. २.

३४ समुद्रस्यानु विक्षरम्—अनु । विऽक्षरम् ६. १०५. ३.

३५ दक्षिणामन्वावृतम्—अनु । आऽवृतम् १०. ५. ३७.

३६ दीर्घामनु प्रसितिं दीध्युर्नरः—अनु । प्रऽसितिम् १४. १. ४६ = X. 40. 10.

चरत ३७ समानं योनिमनु संचरन्तम्—अनु । सम्ऽच- १८. ४. २८ = X. 17. 11; TS. III. 1. 8. 3.

यद्वस्ता, सॅ ३८ यद्वस्तावधि संश्रुतम्—अधि । सम्ऽश्रुतम् १. ३. ६.

३९ पृथिव्या अध्युद्भृतम्—पृथिव्या । अधि । उत्ऽभृतम् २. ३. ५.

४० मधोरधि प्रजातासि—अधि । प्रऽजाता १. ३४. १.

Repeated पृथिव्या अध्युद्भृतम्—२. ३. ५.

४१ पृथिव्या[8] अध्युत्ततम्—अधि । उत्ऽततम् २. ७. ३.

पचा ४२ पश्चात्पश्चाधि निर्मिता—अधि । निःऽमिता ८. ९. ४.

४३ मातुर्मात्राधि निर्मिता—अधि । निःऽमिता ८. ९. ५.

४४ ततः परि प्रजातस्य—cp. कुतो अधि प्रजातम् ९. ९. १८.

४५ कस्मिन्नङ्गे ऋतमस्याध्याहितम्—अधि । आऽहितम् १०. ७. १.

C parıpra—one word, cited as an ex under II 40, and a counter-ex. under II 66

C. anuvyā—one word.

C anupravā-one word

RV X. 40 10 and Paı. dīdhıyuḥ.

C samśrıtam

1. Vn. omits ध्या. 2 Vn. प्रशिष्य 3. Vn. मगत्यः. 4. Vn. परची०. 5 Vn. ध्या अगृत. 6. Vn. मधोमरधि. 7. Vn. अद्भृतं. 8. Vn. ०व्याध्युत्तत. 9. Vn. पृजा०. 10 Vn. omıts ध्या.

४६ द्यौर्यस्मिन्नध्याहिता—अधि । आऽहिता १०. ७. १२.

च्छि ४७ पुरुषेऽधि समाहिताः[2]—अधि । सम्ऽआ- १०. ७. १५.

४८ उच्छिष्टेऽधि समाहिते[3] ?

समाहिताः ४९ उच्छिष्टेऽधि समाहिताः—अधि । सम्ऽआ- ११. ७. ९.

सँ ५० संवत्सरोऽध्युच्छिष्टे—अधि । उत्ऽशिष्टे ११. ७. १८.

५१ अति दुर्गाणि विश्वा—अति । दुःऽगानि ७. ६३. १.

५२ अति[4] दुरितान्यग्निः—अति । दुःऽइतानि ७. ६३. १.

अति दुर्गा ५३ अति दुर्गाण्येषः—अति । दुःऽगानि ९. ५. ९.

दुर्गा, स्रोत्याः ५४ अति दुर्गाः स्रोत्याः[6]—अति । दुःऽगाः १०. १. १६.

durgáni cited as an ex. under vibhaktyāgamaprātipadikāntasya III 78, which cerebralises the n of a case-ending, that of an āgama and the final n of a prātipadika, if the alterants precede.

|| ५ ||

11 || गतिपूर्वो यदा धातुः[7] कश्चित्स्यात्तद्धितोदयः ।
समस्यते गतिस्तत्रागमिष्ठा इति निदर्शनम् || ११ ||

गमिष्ठा इति

[आगमिष्ठाः—भजन्त पितरस्त इहागमिष्ठाः—इह । आऽग- १८. १. ४५= X. 15. 3.]

ततः परिष्वजीयसी देवता सा मम प्रिया—परिऽस्व- १०. ८. २५.

लवणाद्विक्लेदीयसीः—विऽक्ले- ७. ७६. १.

12a || उपसर्गपूर्वमाख्यातमनुदात्तं विगृह्यते ।
उदात्तं यत्समस्यत उपसर्गो निहन्यते || १२ ||

upasarga ākhyātenodāttena samasyate IV 1.

[*a* तं प्रत्यस्यामि मृत्यवे—प्रति । अस्यामि ५. ८. ५.
b यं बल्बजं न्यस्यथ—निऽअ- १४. २. २२]

तस्यापवादः[8]—
12b || समाने योनावध्यैरयन्ताधि तस्थुर्येऽसतः परि जज्ञिरे
समुद्रादधि जज्ञिषे परि भूम जायसे ||

yónāv ádhy afrayantādiṣu ca IV. 5 Examples as marked here.

रयत [समाने योनावध्यैरयन्त—योनौ । अधि । ऐ- २. १. ५=VS. 32. 10.

यत्रेमा विश्वा भुवनाधि तस्थुः—अधि । तस्थुः ९. ९. २=I. 164. 2.

येऽसतः परि जज्ञिरे—असतः । परि । जज्ञिरे १०. ७. २५.

C. -sataspa-

यो अग्रतो रोचनानां समुद्रादधि जज्ञिषे—अधि । जज्ञिषे- ४. १०. २.

यदेको विश्वं परि भूम जायसे—परि । भूम verbal form ? । जायसे १३.२.३]

12c || द्युपसर्गपूर्वमाख्यातं[9] यदा भवेदुदात्तवत् ।
अनर्थकः कर्मप्रवचनीयो व्यूढो वा विगृह्यते ||

व्यूठो

1. Vn. Omits ध्या 2. After this Vn has पुरुषेऽधि समाहिता. 3. Vn. repeates it. 4 Vn. omits द्यु. 5. Vn. धितु दु०. 6 Vn स्राया . 7. गतिपूर्वे धातौ कश्चिद्गतिः समस्यते तद्धिते परे on the margin. 8. द्युपसर्गपूर्वमुदात्तमाख्यातं विगृह्यते उपसर्गश्च न निहन्यते on the margin 9. उदात्ते द्युपसर्गे धातौ अनर्थकः कर्मप्रवचनीयः पृथग्वा विगृह्यते on the margin.

सँ
जगहे

यावत्तेऽभि विपश्यामि—अभि । विऽपश्यामि- १२. १. ३३.
यं त्वा होतारं मनसाभि संविदुः—अभि । सम्ऽविदुः ३. २१. ५.
यावत्साभि विजङ्गहे—सा । अभि । विऽज- √गाह् or √जह् ५. १९. ४.
यो विश्वाभि विपश्यति—अभि । विऽपश्यति- ६. ३४. ४.

pūrvenābhívipáśyāmyādısu IV 4
The former preposition is disjoined.
Examples as marked here
The separate accent of abhı is a case falling under IV.4.

याः पतंगो अनु विचाकशीति—अनु । विऽचा- १३. ३. १.
रति यस्मात्समुद्रा अधि विक्षरन्ति—अधि । विऽक्ष- १३. ३. २.
स यत्प्राचीं दिशमनु व्यचलत् (अनु । विऽअ- १५. १४. १.) इति।

13a ॥ वचने वचने पूर्वं पूर्वेण तु विगृह्यते ।
उत्तरेण समस्यत उभाभ्यां तु परं पदम् ॥ १३ ॥

13b ॥ उपसर्गपूर्वमाख्यातं यत्रोभाभ्यां समस्यते ।
सामर्थ्यमुभयोस्तत्रासामर्थ्येषु विग्रहः ॥

13c ॥ अनर्थककर्मप्रवचनीयान्ययुक्तैरभिवितन्वादिषु ॥

॥ ६ ॥

°anaıthakakarmapravacanīyānyayuktaır vıgrahobhıvıtanvādısu IV. 3
Examples as marked here.

१ इहैवाभि वि तनूभे—अभि । वि । तनु १. १. ३.
सँ सँ स्रवतु २ सं सं स्रवन्तु सिन्धवः—सम् । सम् । स्रवन्तु- १. १५. १.
३ इदमू षु प्र साधय—इदम् । ऊं इति । सु । प्र । सा- १. २४. ४.
४ उप प्रागाद्देवः—उप । प्र । अगात् १. २८. १.
५ अभि प्रेत मृणत सहध्वम्—अभि । प्र । इत । मृ- ३. १. २.

C mrnatah-hımsatah

६ तदेषां परि निर्जहि—परि । निः । जहि ३. २. ४.
७ अभि प्रेहि निर्दह—अभि । प्र । इहि । निः । दह ३. २. ५.
८ आ प्र द्रव परमस्याः परावतः—आ । प्र । द्रव ३. ४. ५.
९ अरिष्टवीरा उप सं चरेम—उप । सम् । चरेम ३. १२. १.
१० गृहानुप प्र सीदामि—उप । प्र । सीदामि- ३. १२. ९.
११ स्वधा अभि प्र तस्थौ—अभि । प्र । तस्थौ ४. १. ३.

TS. II. 3. 14. 6 svadhayābhı-

१२ अभि प्रेहि माप वेनः—अभि । प्र । इहि ४. ८. २.
यंतु १३ उप प्र यन्तु नरो अग्निरूपाः—उप । प्र । यन्तु ४. ३१. १.

RV. X. 84. 1 abhí prá y–; TB. II. 4. 1 10 yantı

लयन्ताम् १४ पराजितासो अप नि लयन्ताम्—अप । नि । ल- ४. ३१. ७ = X. 84. 7
१५ अभि प्रेहि दक्षिणतो भवा नः—अभि । प्र । इहि ४. ३२. ७ = X. 83. 7.
वाजसातय आ- १६ पर्यू षु प्र धन्वा वाजसातये—सु । प्र । धन्व ५. ६. ४.

RV. IX. 110. 1 dhanva, so SV 1. 428, II 714

१७ आ प्र यातु परावतः—आ । प्र । यातु ६. ३५. १ = VS. 18 72.
१८ उप प्रागात्सहस्राक्षः—उप । प्र । अगात् ६. ३७. १.
सँ १९ इन्द्रं सखायो अनु सं रभध्वम्—अनु । सम् । रभध्वम्- ६. ९७. ३
= X 103. 6; SV. II. 1204.
तंतु २० अछिन्नं तन्तुमनु सं तरेम—अनु । सम् । त- ६. १२२. १ TA. II. 6. 1. 5.

२१ तदु षु प्र वोचत्—सु । प्र । वोचत् ७. ७३. ७=1. 164. 26.

२२ अग्निमिव जातमभि सं धमामि—अभि । सम् । धमामि ८. २. ४. — Concordance samdh-may be corrected.

ह — २३ हृदयेऽधि नि विध्यताम्—अधि । नि । विध्यताम् ८. ६. २४.

२४ समानं योनिमनु सं चरेते—अनु । सम् । चरेते इति ८. ९. १२; cp. 3. 33. 3. — MS. II. 13. 10: 160 3 anusáṃcarete, TS IV. 3. 11 ánu samcáranti.

अधि वि — २५ तृतीये नाके अधि वि श्रयैनम्—अधि । वि । श्रय । एनम् ९. ५. ४; १८. ८. ३.

२६ अग्नेरग्निरधि सं बभूविथ—अधि । सम् । बभूविथ ९. ५. ६.

२७ तृतीये नाके अधि वि श्रयस्व—अधि । वि । श्रयस्व ९. ५. ८.

अभि सवमन्त, so Vn. — २८ सप्त स्वसारो अभि सं नवन्त—अभि । सम् । नवन्त ९. ९. ३. — RV 1. 164. 3 navante

२९ तस्याः समुद्रा अधि वि क्षरन्ति—अधि । वि । क्षरन्ति ९. १०. २१. — TB. II. 4. 6 tásyām

कुसिंधे — ३० कुसिन्धे अध्या दधौ—अधि । आ । दधौ १०. २. ५.

अनु विक्रमेहम् — ३१ अनु वि क्रमेऽहम् (अनु । वि । क्रमे १०. ५. २५-३५) इत्येकादश ।

अमृतेधि — ३२ अमृतेऽधि वि[1] चक्रमे—अधि । वि । चक्रमे १०. ८. ४१.

३३ कं लोकमनु प्राविशत्—अनु । प्र । अविशत् ११. ८. ११.

३४ शरीरं श्रद्धा दक्षिणाश्रद्धा चानु प्राविशन्[2]—अनु । प्र । अ– ११. ८. २२.

३५ शरीरमनु प्राविशन् (अनु । प्र । अ– ११. ८. १९, २०, २१) इति यावद्वा ।

तेनास्मॅं; सॅं — ३६ तेनास्माँ अपि सं सृज—अपि । सम् । सृज १२. १. २५.

३७ ऊर्जं पुष्टं बिभ्रतीमन्नभागं घृतं त्वाभि नि षीदेम भूमे—अभि । नि । सी– १२. १. २९.

पथाम् — ३८ परं[1] मृत्यो अनु परेहि पन्थाम्—अनु । परा । इहि १२. २. २१=X. 18. 1.

सॅं — ३९ आपस्पुत्रासो अभि सं विशध्वम्—अभि । सम् । विशध्वम् १२. ३. ४.

सॅं — ४० पितेव पुत्रानभि सं स्वजस्व[3] नः—अभि । सम् । स्व– । नः १२. ३. १२.

सॅंस्पृशताम् — ४१ अद्भिरात्मानमभि सं स्पृशन्ताम्—अभि । सम् । स्पृशन्ताम् १२. ३. ३०.

४२ एकस्मिन्पात्रे अध्युद्धरैनम्—अधि । उत् । हर १२. ३. ३६.

४३ त्वचो धूमं पर्युत्पातयासि—परि । उत् । पातयासि १२. ३. ५३.

४४ समुद्रमनु[4] सं चरत्—अनु । सम् । चरत् १३. २. ४०.

४५ अस्मिन्तां स्थाणावध्या[5] सजामि—अधि । आ । सजामि १४. २. ४८.

४६ स प्राचीं दिशमनु व्यचलत् (अनु । वि । अ– १५. २. १-४) इति यावद्वा ?

४७ स दिशोऽनु व्यचलत्—अनु । वि । अ– १५. ६. ८.

४८ स विशोऽनु व्यचलत्—१५. ९. १.

४९ तं विराडनु व्यचलत्—१५. ६. ८.

५० स[6] सर्वानन्तर्देशाननु व्यचलत्—१५. ६. ९.

५१ इत एत उदारुहन्—उत् । आ । अरुहन् १८. १. ६१. — SV. 1. 92 udáru- C etat for eta=ete

प्रेष्यन्तं पूषणं — ५२ उप प्रेष्यंतं[7] पूषणं यो वहाति—उप । प्र । इष्यतम् १८. २. ५३. — S. présyantam (pra-ī-) so C. 'pres-pragachantam'

प्रोर्णुष्व — ५३ सं प्रोर्णुष्व मेदसा पीवसा च—सम् । प्र । ऊ– १८. २. ५८=X. 16. 7.

---

1. Vn. omits वि. 2. Vn प्रवशान्. 3. Vn. सॅंस्वताद्भिः. 4. समुद्रामनु संचरतां. 5. Vn. स्वस्थाणा. 6. Vn. omits स. 7. Vn. प्रेष्य नू पू-.

५४ पत्युर्जनित्वमभि सं बभूथ—अभि । सम् । ब– १८. ३. २=X. 18. 8.

५५ ऋतस्य नाभावभि सं पुनाति—अभि । सम् । पुनाति १८. ३. ४०. RV. X. 13. 3 nábhāv ádhi

५६ अभि प्रेहि मध्यतो मार्प हास्थाः—अभि । प्र । इहि १८. ३. ७३.

तृतीये नाके अधि वि श्रयस्व—१८. ४. ३.

५७ आ प्र च्यवेथामप तन्मृजेथाम्—आ । प्र । च्यवेथाम् १८. ४. ४९.

॥ ७ ॥

14 ॥ एकेन[1] द्वे ॥ १४ ॥

एकेन कारणेन द्वे आख्याते न निहन्येते ।

छंद, कांक्ष्या

"छन्दस्यनेकमपि साकाङ्क्षम्"

chandasyanekam-apı sākānksam P 8 1. 35.

इत्युक्तम् । एकेन इति न वक्तव्यम् । अथवा वक्तव्यम् । कुतः ?

स्मित्या

संदेहात् । आम्नायविधिदर्शनात् । विज्ञानस्यातुल्यत्वात् । अस्त्यस्मिन् न्यायमुखे संभव इति ।

१ न यस्य हन्यते सखा न जीयते कदाचन—हन्यते, जीयते १. २०. ४. RV X. 152. 1. ná jíyate kádā-

२ यथायमरपा असदथो अहरितो भुवत्—असत्, भुवत् १. २२. २.

३ यथा द्यौश्च पृथिवी च न बिभीतो न रिष्यतः—(बिभीतः, रि– २. १५. १–६) इति षट् ।

४ यथा नः सर्व इज्जनः[2] संगत्यां सुमना असद्दानकामश्च नो भुवत्—असत्, भुवत् ३. २०. ६.

भ्यँ

५ यस्तुभ्यं शामसत्क्षम तस्मै त्वं भव—असत्, भव ३. २३. ५. 'The accent of bhavá at the end is anomalous' W

६ येन देवा न वियन्ति नो च विद्विषते मिथः—विऽयन्ति, विऽद्विषते ३. ३०. ४.

त्वँ

७ त्वं विश्वेषां जनिता यथासः कविर्देवो न दभायत्स्वधावान्—असः, दभायत् ४. १. ७. W dábhāya=not to be harmed, against authorities.

य

८ यं क्रन्दसी अवतश्चस्कभाने भियसाने रोदसी अह्वयेताम्—अवतः, अह्वयेताम् ४. २. ३=X. 121. 6. C āhvayetām

९ यस्य नेशे यज्ञपतिर्न यज्ञो नास्य दातेशे न प्रतिग्रहीता—न । ईशे, ईशे ४. ११. ५.

कर्तुं

१० यश्चकार न शशाक कर्तुम्—चकार, शशाक ४. १८. ६. W śaśāka enclitic.

११ येन जयन्ति न पराजयन्ते—जयन्ति । पराऽज– ४. २२. ५; TB. II. 4.7.8.

१२ मन्वे वां मित्रावरुणावृतावृधौ सचेतसौ[3] द्रुह्वणो यौ नुदेथे ।

१३ प्र सत्यावानमवथो भरेषु तौ नो मुञ्चतमंहसः—नुदेथे, अवथः ४. २९. १, २.

